August 2015 IJRSS Volume 5, Issue 3 ISSN: 2249-2496

# विशिष्टाद्वैते चिद्विचारः

प्रो. वाई.एस.रमेशः
रा.सं.संस्थानम्, जयपुरपरिसरः, जयपुरम्

**सारांशः-**

सर्वेषामपि दर्शनानां 'रागद्वेषनिरसनमेव प्रधानमुद्देश्यम्। तत्त्वज्ञानात्-मोक्षसिद्धिरिति प्रतिपाद्यत्वादपि सर्वदर्शनसामरस्यं सिद्धम्। प्राचीनैरिदमङ्गीकृतं च। निरुक्ते यास्काचार्येण प्रतिपादितं यत् –

''एवमुच्चावचैरभिप्रायै ऋषीणां दृष्टयो भवन्ति'' इति। अपि चोक्तं महाभारते -

**शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः**
**स एव सर्वशास्त्रज्ञः यस्य शान्तं मनस्सदा।**
**यच्छ्रुतं न विरागाय न धर्माय न शान्तये**
**न शब्दमपि शब्देन काकवासितमेव तत्।।** इति।

न्यायकुसुमाञ्जलिकारः श्रीमदुदयनाचार्यश्च सर्वदर्शनेषु परमेश्वराभ्युपगमं तावत् विपुलग्रन्थसन्दर्भैः न्यरूपयत्। तथा हि-

''इह यद्यपि यं कमपि पुरुषार्थं कामयमानाः ''शुद्धबुद्धस्वभावः' इत्यौपनिषदाः, 'आदि विद्वान् सिद्ध' इति कापिलाः, क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति'' - पातञ्जलाः, ''लोकवेदविरुद्धैरपि निर्लेपस्स्वतन्त्रश्चेति''-पाशुपताः, ''शिव'' इति शैवाः, ''पुरुषोत्तम'' इति वैष्णवाः, ''पितामह'' इति पौराणिकाः, ''यज्ञपुरुष'' इति याज्ञकाः, ''यावदुक्तोपपन्न'' इति नैयायिकाः, ''लोकव्यवहारसिद्ध'' इति चार्वाकाः, कारवोऽपि यं 'विश्वकर्मेत्युपासते, तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवत्-आसंसारं प्रसिद्धानुभावे भगवति सन्देह एव कुतः ? किं निरूपणीयम् ? इति।

एवं सर्वदर्शनानां मतं विज्ञाय अपि विशिष्टाद्वैतदर्शनसिद्धान्तः कः ? इतिविशिष्टाद्वैते चिद्विचारः इति शीर्षकमुखेन दिङ्मात्रं विचारितः ।

**उद्देश्यानि –**

- सर्वज्ञस्य सत्यसङ्कल्पस्य स्वाभाविकज्ञानबलक्रियाशक्तियुक्तस्य निखिलजगदुदयत्रिभवलयलीलस्य च पुरुषोत्तमस्य दिव्यमङ्गलविग्रहविभूतिगुणयोगप्रतिपादनम् ।
- परब्रह्मण इव जगतः पारमार्थ्यनिरूपणम्।
- जगद्ब्रह्मैक्यपरं वेदान्तपरमरहस्यस्य विवरणम् ।
- सर्वमतानां सर्वप्रमाणानां , सर्वन्यायानां सामरस्य याथार्थ्यप्रतिपादनम् ।

**मुख्यांशाः-**

चित्-अचित् ईश्वरः बुद्धः मुक्तः नित्यः ।

**विषयोपस्थापनम्-**

चिदचिद्विशिष्टः श्रीमन्नारायण एक एव 'तत्त्वम्' इति विशिष्टाद्वैतसिद्धान्तः। सिद्धान्तोऽयं भगवद्बोधायन-टङ्काचार्य-द्रमिडमुनि-गुहदेह-भारुचि-भर्तृमित्र-भर्तृप्रपञ्च-नाथमुनि-यामुनगुरु-रामानुजयतिराजादिभिराचार्यैःप्रवर्तितः। विशिष्टाद्वैतदर्शनेऽस्मिन् 'चित् अचित् ईश्वरः' चेति त्रीणि तत्त्वानि। तत्र चित्-जीवात्मा। असौ देहेन्द्रिय मनः प्राण-ज्ञानातिरिक्तः ज्ञानाश्रयः, अजः, ज्ञानानन्दामलात्मकः अचिन्त्यः अव्यक्तः निरवयवः, निर्विकारस्वरूपः ईश्वरस्य नियाम्यः धार्यः शेषश्च। अयमात्मा 'बुद्धः मुक्तः

नित्यश्चेति त्रिविधो भवति।

संसारसागरनिमग्नेषु, सङ्कुचितज्ञानेषु, देवमनुष्यतिर्यक्स्थावररूपेषु चतुर्विधदेहेषु प्रविष्टाः तद्देहे तदनुबन्धेषु च ममत्वमवाप्य क्लेशतापाद्यनुभविनः ‘‘बुद्धाः’’।

सर्वेश्वरानुग्रहेण सत्सङ्गमवाप्य संसारनिस्सङ्गो भूत्वा सदाचार्य समाश्रयण लब्धज्ञातव्यार्थपञ्चकतत्त्वविज्ञः सर्वेश्वराराधने सन्ततध्याननिमग्नः प्रारब्धकर्मशकलमनुभूय प्रक्षीणकर्मान्तरं न्यासविद्यया निरङ्कुशसर्वेश्वरदयापात्रम् अनादिकर्मवासनारूपमाया विमुक्तं, हार्दानुग्रहलब्धमध्यधमनिद्वारा बहिर्निर्गतं अर्चिरादिमार्गे तत्तद्देशाधिकृतसम्भावितां विरजानदीस्नानप्रसादितभगवत्सारूप्यं, सालोक्यं, सापुण्यं श्रीवैकुण्ठलोके महामणिमण्डपे शेषपर्यङ्के अप्राकृत विविधपरिचरपरिचारिका निर्वाह्यमाणपरिचर्यं श्री भू नीळा प्रभृति देवीमृदुहस्तपल्लवसंवाह्यमानं चरणारविन्दं, दिव्यमङ्गलविग्रहविशिष्टम्, अपारकृपामृतत्तरङ्गितपाङ्गयुगलं, साक्षान्मन्मथमन्यं प्रसन्नपारिजातं भगवन्तं साक्षात्कृत्य तदनुभवजनितानन्दामृतसागरान्तर्निमग्न सर्वावयवसम्पन्नः ‘‘मुक्तः’’।

भगवन्नित्यसंकल्पानुरोधे अस्पृष्टसंसारगन्धाः सर्वदा भगवदनुभवपरिपूर्णाभूताः अनन्तः-गरुडः-विश्वक्सेनादयो ‘‘नित्याः’’।

‘अचित्’ नाम ‘प्रकृतिः’। ‘तत् ज्ञानशून्यम्, विकारास्पदम्, सत्वरजस्तमोमयगुणत्रयात्मकम्। ‘शुद्धसत्वम्, मिश्रसत्वम्, सत्यशून्यं चेति। तत्त्रिविधम्। तत्र शुद्धसत्वम् अप्रकृतमण्डलम्, तदेव नित्यविभूतिः परमपदं श्रीवैकुण्ठम्। तत्र श्रियः पतिः भगवान् श्रीभूनीलासमेतः नित्यमुक्तपरिषन्निषेव्यमानः निर्भरानन्दपरिपूर्णो तिष्ठति।

**‘‘क्षयन्तमस्यरजसः पराके’’**

**‘‘तमसस्तुपारे’’ ‘‘तमसः परस्तात्’’**

**‘‘तद्विष्णोः परमं पदं सदा पश्यन्तिसूरयः’’**

‘‘वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः आस्ते विष्णुरचिन्त्यात्मा भक्तै र्भागवतैस्सह इत्यादि प्रमाणैरिदं वर्णितं वर्तते।

रजस्तमांसि रजस्तमोभ्यां विरहितस्य, सत्वगुणमात्रप्रचुरस्यास्य ‘शुद्धसत्वम्’ इति व्यवहारः। शुद्धसत्वमयादेव कोटिसूर्यपुंतीकाश ज्योतिर्मयं, भगवत्सङ्कल्पं सुविज्ञाय स्वयं तत्तत्कालोचिततया रथ गोपुरमण्डपादिं भोग्यजाततयापरिणमत् नित्यं निरवद्यं च भवति। तत्र गतानां कर्मनिबन्धनरूप पुनरावृत्तिर्नविद्यत इति ‘‘न च पुनरावर्तते न च पुनरावर्तते’ इत्यादि श्रुतिवाक्यानि बोधयन्ति।

एतद्देशप्राप्तये ‘अर्चिरादि’ मार्गः नु साधनम्। वेदान्तेषु तदुपवर्णितं वर्तते।

मिश्रसत्वं प्राकृतमण्डलम्। इदमेवजगतः सृष्टे:मूलम्। सांख्यदर्शनोक्तदिशा महदादिभूतपर्यन्ता निखिलापि तत्त्वसृष्टिरस्मादेवोपजायते।

सत्वशून्यः कालः। असौ परमपदे न विद्यत इति केचित्;विद्यमानोऽपि भगवत्सङ्कल्पानुरोधेन भवति किन्तु प्राकृतमण्डलस्थ इव प्रभासम्पन्नो न भवति। इति अन्ये केचिदङ्गीकुर्वन्ति।

ईश्वरोऽखिलहेयप्रत्यनीककल्याणैकतानः स्वेतरसमस्तवस्तुविलक्षणः सत्यज्ञानान्तानन्दामलस्वरूपः सकलजगदुदयविभवलयलीलास्वरूपः नित्यकामः सत्यसङ्कल्पः, परमकारुणिकः श्रीभूनीलानायकः श्रीमन्नारायणः। तत्तच्छाखासु परतत्त्ववाचकाः शम्भु-शिव-ब्रह्म-रुद्रेन्द्राग्न्यादिशब्दाः सर्वे सर्वान्तरात्मानं नारायणमेव प्रतिपादयन्ति।

शरीरवाचकाः शब्दाः सर्वे शरीरपर्यन्तबोधका इत्यतः सर्वे शब्दाः सर्वशरीरिणं श्रीमन्नारायणमेव ज्ञापयन्ति।

चेतना परमचेतनपुरुषकाररसिका पुरुषकारान्तरनिरपेक्षा, अशरण्यशरण्या, सर्वसमाश्रयणीया नित्यानपायिनी

सर्वलोकजननी देवदेवदिव्यमहिषी मङ्गलदेवतैव पुरुषकारिणी सती सकलसम्पत्प्रदात्रिरूपेण विद्यते।

प्रत्यक्षानुमानागमानि प्रमाणानि। तेषां प्रमाणानां प्रामाण्यं यथावस्थिततया अङ्गीक्रियते।

जगज्जन्मादिकारणभूतं परब्रह्माणं बोधयति नित्यनिर्दुष्टो निगमराशिरेव। तस्य प्रत्यक्षादीनां च विरोधो नास्ति कश्चन। ''चित् अचित् ईश्वरः' च स्वरूपस्वभावेन भिन्ना एव। अयुतसिद्धैः प्रकार-प्रकारिरूपत्वात् शरीरिभावैः अभिन्नाः। सर्वे सत्याः नित्या एव। अचितः अवस्थान्तरप्राप्तिरूपपरिणामो जायमानो भवति।

चेतनः धर्मीभूतज्ञानः। तस्य स्वरूपपरिणामादयः केऽपि न सन्ति। असौ ज्ञानगुणकः, ज्ञानस्वरूपश्च । एवमेव परमात्मा अपि ज्ञानगुणकः, ज्ञानस्वरूपश्च। ईश्वरस्य धर्मभूतज्ञानं सर्वदेशकालावस्थासु विभुस्तिष्ठति। तस्य सङ्कोचविकासौ न स्तः चेतनस्य धर्मभूतज्ञानस्य सङ्कोचविकासौ स्तः। स्वभावेन असङ्कुचितोऽपि कर्मरूपादविद्यासम्बन्धात् चेतनस्य ज्ञानप्रसरणस्य निरोधः सम्भवति। तस्मात् बद्धानां धर्मभूतज्ञानं सङ्कुचितं भवति। मुक्तानां संसारदशायां सङ्कुचितम् (विभुः) मोक्षदशायां विभुः (असङ्कुचित) भवति। चेतनस्य विलक्षणदेशविशिष्टः, विशिष्टब्रह्मानन्दानुभव एव मोक्षः। तत्साधनभूतस्तु श्रीमन्नारायण एव कर्म-ज्ञान-भक्तिप्रपत्तयः भगवदनुग्रहसम्पादकाः भूत्वा परम्परया साधनानि भवन्ति।

**''अमृतस्त्येष सेतुः'' ''एष सेतुर्विधरणः'** इत्यादिश्रुतिवाक्यानि मोक्षसाधनत्वेन भगवन्तमेव निर्दिशन्ति।

**''नायमात्मा प्रवचनेन लभ्यो न मेधया न**
**बहुनाश्रुतेन, यमेवैष वृणुते तेन लभ्यः,**
**तस्यैष आत्मा विवृणुते तनूं स्वाम्''**

- कठोपनिषद् 1/2/25

इतीयं श्रुतिः ''श्रवण-मनन-निदिध्यासनादयोऽपि भगवत्प्राप्तिसाधनानि न। भगवतः यस्मिन् निरवधिकप्रीतिरुपजायते तस्यैव भगवत्प्राप्तिर्भवति। भगवति येषां निरतिशयप्रीतिरस्ति तेष्वैव तस्य (भगवतः) प्रीतिर्भवति। प्रियतम एव नु लोके वरणीयो भवति। तस्माद् भगवदनुग्रह एव भगवत्प्राप्तिसाधक' इति उपदिशति। एतदेव -

**तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।ददामि बुद्धियोगं तं येन मामुपयान्ति ते।।** इति गीतायां भगवानुपादिशत्।

**''ऐतदात्म्यमिदं सर्वं'' ''सर्वं खल्विदं ब्रह्म'' तत्त्वमसि श्वेतकेतो''**

इत्यादिश्रुतिवाक्यैः शरीरशरीरिभावप्रयुक्तो जगदब्रह्मभेदः प्रतिपाद्यते। अत्र जगद्ब्रह्मणोः स्वरूपभेदोपपादनं न शक्यम्। तथाङ्गीकारे तत्प्रकरणोपक्रमे- **''उत तमादेशमप्राक्ष्यः''**

**''तदैक्षतबहुस्यां प्रजायेय''(छान्दोग्योपनिषद् 6/2/3)** इत्यादिवाक्यैः अनवगत-सर्वज्ञत्वसत्यसङ्कल्पत्वादि कल्याणगुणगणाय बाधा, जगत्सत्यत्व, ब्रह्ममिक्थ्यात्वादि प्रसक्तिश्च जायेत। तस्मात् शरीरशरीरिकृताभेद एव तत्रोपदिष्ट अभेदः।

**''स देव सौम्येदमग्रआसीदेकमेवाद्वितीयं ब्रह्म''(छान्दोग्योपनिषद् 6/2/1)**इति श्रुतौ प्रकरणौपयिकमभिन्ननिमित्तोपादानकत्वमेव जगते उपदिश्यते। किन्तु सजातीय-विजातीय स्वगत-भेदनिवृत्तिर्न प्रत्तिपादयितुमर्ह्यते। 'स देव, एक एव' इति पदाभ्यामुपादानकारणत्वम्, 'अद्वितीयम्' इति पदेन निमिततान्तरनिषेधञ्च प्रतिपाद्येते।

उत्तरत्र **''बहुस्याम्''** इति बहुभवनसङ्कल्पत्वात् तत्प्रतिभटः सूक्ष्मभाव एव 'एक' शब्दस्यार्थत्वेन युक्तः।

परब्रह्मणः कारणावस्थायां कार्यावस्थायां चिदचिद्विशिष्टत्वमव्याहतम्। तस्मात् सूक्ष्मचिदचिद्विशिष्टब्रह्मकारणं स्थूलचिदद्विशिष्टब्रह्मकार्यम्। अतएव कार्यकारणयोरभेदः सिद्ध्यति। अयमेव विशिष्टाद्वैतः।

विशिष्टं च विशिष्टं च विशिष्टे, विशिष्टयोरद्वैतं विशिष्टाद्वैत इति व्युत्पत्तिः। चिदचिद्विशिष्टमेव कार्यं कारणं चेति निर्गलितम्।

अतएव **''येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्'** इति एकपदार्थविज्ञानेन सर्वपदार्थविज्ञानं मृत्पिण्डघटशरावादि दृष्टान्तोपपादनमुखेनोपापाद्यत। ब्रह्मभिन्नः प्रपञ्चोऽसत्यश्चेत् एकभिन्नमितरं ज्ञातव्यनास्तीत्यतः विज्ञानेन सर्वविज्ञानमुपपादित्वेन विद्यते। स्वरूपस्वभावैश्चिदचिद्ब्रह्माणि भिन्नानीत्यतः यादवभास्करा इव भेदाभेदवादो नाङ्गीक्रियते। शरीरात्मभावेनाभेदोङ्गीक्रियते। ब्रह्मात्मकस्य-अचिदंशस्यैव परिणामः। तद्द्वारा ब्रह्मणः उपादानकारणत्वं निर्व्यूढमित्यत: ''निर्विकार'' श्रुत्यादिव्याकोपो नास्ति इति विशिष्टाद्वैतसिद्धान्तः। प्रत्यक्षादिप्रमाणानां श्रुतेश्च विरोध एव न वर्तते। प्रत्यक्षाप्रज्ञातान् कांश्चन् विशेषान् श्रुतिः बोधयति। श्रुतिवाक्यानि चानैकविधानि सन्ति। सर्वेषां प्रामुख्यं प्रामाण्यं च यथा सम्भवेत्तथा उपपादनं हि युक्तम्।

**सन्दर्भग्रन्था:-**


1. निरुक्तम्
2. महाभारतम्
3. न्यायकुसुमाञ्जलिः
4. पातञ्जलयोगप्रदीपः
5. कठोपनिषद्
6. छान्दोग्योपनिषद्
7. श्रीमद्भगवद्गीता।